# श्रीमद्भगवद्गीतायाः सारार्थवर्षिणीटीकायां भक्तितत्त्वम्

**तिलकराजः**

श्रीमद्भगवद्गीता साक्षात्भगवतः श्रीकृष्णस्य मुखारविन्दनिस्सृतत्वात् उपनिषद्मयी अस्ति। अस्य कृत्स्नस्य उपनिषद्समुदायस्य इयं साररूपास्ति। अस्य च ग्रन्थस्य नैकाः टीकाः संदृश्यन्ते । तासु टीकासु सारार्थवर्षिणी नाम्नी काचित् तत्त्वमयी भक्तेः साधयिता विधायिनी टीका अन्यतमा अस्ति। इयं टीका आचार्य-चूडामणिना ठाकुरविश्वनाथचक्रवर्तिना विरचिता अस्ति। सारः नाम निर्यासः सः एव अर्थः प्रयोजनं यस्य असौ सारार्थः= भगवतः प्रेमलक्षणभक्तिः तं सारार्थं नाम प्रेमलक्षणभक्तिं वर्षति इति टीकायाः अन्वर्था संज्ञा । भगवतभक्तानां टीकेयम् उपजीव्यं वर्तते। भगवद्भक्तिः कर्म-ज्ञानवैराग्यादीनाम् आश्रयरूपा वरीवर्ति। एतत् एव आचार्येण प्रतिपादितम् । एवं गीताशास्त्रस्य त्रिकः षट्काः वर्तन्ते नाम आदौ कर्मषट्कः अन्ते ज्ञानषट्कः मध्ये च भक्तिषट्कः राजतेतमः। अस्यार्थः भक्तियोगः अनयोः तलद्वयोः ज्ञान-कर्मणोः परमाश्रयरूपम्। तदुक्तम्-

**‘भक्त्या मामभिजानाति,’**[1] **‘भक्त्या लभ्यस्त्वनन्यया ,**[2]**’ ‘भक्त्याहमेकया ग्राह्यः’,**[3] **‘ ‘भक्त्या तुष्यति केवलम्’,**[4] **‘भक्तिरेवैन नयति,’**[5] **‘न साधयति मां योग’’**[6] इत्यादिषु

[1] सारार्थवर्षिणी टीका -18.55

[2] सारार्थवर्षिणी टीका -8.22

[3] सारार्थवर्षिणी टीका -11.44

[4] सारार्थवर्षिणी टीका -

[5] सारार्थवर्षिणी टीका -

[6] सारार्थवर्षिणी टीका -

भगवद्भक्ते परं वैशिष्ट्यम् उद्गीतम्। मानवजीवनं भक्तिं विना निस्फलम्। लब्धबोधोऽपि भगवद्भक्तिं विना क्लेशमेव भुङ्क्ते इत्यत्र श्रीमद्भागवतशास्त्रं प्रमाणं ददाति-

**श्रेयः श्रुतिं भक्तिमदस्य ते विभो क्लिश्यन्ति ये केवलबोधलब्धये।**

**तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघतिनाम्।।**[7]

अस्यार्थः ज्ञानलाभाय इषद् अपि प्रयासम् अकृत्वा भक्तः भक्तिः वर्तमनी प्रभवेत्। भगवती भक्तिः श्रेयसः नाम मङ्गलानां श्रुतिः अस्ति। तां भक्तिं विहाय ये जनाः केवलबोधलब्धये क्लिश्यन्ति। ते **स्थूलतुषावघातिनः** एव वर्तन्ते । **'तुषम् अवघाति इति तुषावघाति' तेन तुषमात्रावघातनेन तुषमात्रं प्राप्नोति इति'।** भावार्थस्तु अयं भक्तिं विना ज्ञानं तुषमात्रमिति । तस्मात् सारार्थदर्शिन्यां टीकायां भगवद्गीतायाः वास्तवं रहस्यं प्रयोजनं च उद्घाटितम्। तद्यथा –

**सततं कीर्त्तयन्तो मां यतन्तश्च दृढव्रताः।**

**नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते।।**[8]

**यो मां पश्यति सर्वत्र सर्वञ्च मयि पश्यति।**

**तस्याहं न प्रणश्यामि स च मे न प्रणश्यति।।**[9]

इत्यादौ सर्वत्र भक्तिरेव अभिधेयः सम्बन्धः प्रयोजनमिति व्यसेन न्यरुपि। किञ्च षष्ठाध्याये योगस्य वैशिष्ट्यं कथनान्तरं भगवता भगवद्भक्तस्य योगवित्तमत्वं प्राकाशयत्। तद् यथा-

**योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।**

---

7 श्रीमद्भाग. 10/14/4

8 सारार्थवर्षिणी टीका -9.14

9 सारार्थवर्षिणी टीका -6.30

**श्रद्धावान्भजते यो मां स मे युक्तमो मतः।।**[10]

तद्वत् राजविद्या-राजगुह्ययोगे गुह्यतमं साधनं निरुप्य "**सततं कीर्तयन्तु माम्**" इत्यादौ दृढवतभक्तानां सातिशयं वैशिष्ट्यं भगवता व्यधायि। भगवन्तं सततं निन्तयन्तः भक्ताः भगवति नित्ययुक्ताः वर्तन्ते। तेषां योगः नाम अप्राप्तस्य प्राप्तिः, तं क्षेमप्राप्तस्य रक्षणं तच्च उभयं भगवान् स्वीकरोति इति स्वप्रतीज्ञवाक्यं ब्रवीति-

**अनन्याश्चियन्तो मां ये जनाः पर्युपासते ।**

**तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यम् ।।**[11]

किञ्च भगवतीं भक्तिं विना कर्मणः नैष्फल्यं निष्पादयतः भगवता सर्वक्रियाणां न्यासः तस्मै स्यात् इति विवेचयन् आह-

**यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।**

**यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ।।**[12]

अस्य एव ऊर्ध्वशालिन्याः भक्तेः वैशिष्ट्यं न्यूनीकृत्य अर्वाचिनः श्रीमद्भगवद्गीतायां कर्मणः एव प्रस्तुतविषयत्वमिति निगदितं न लज्जन्ते इति महान् अयं क्षोभस्य विषयः । तदेव गोपनं विषयं समुद्घाटयता आचार्येण भक्तस्य वैशिष्ट्यम् उद्गायता प्रतिपाद्यते स्वाभिलस्यम्। यथा-

**एवमुक्तो हृषीकेशो गुडाकेशेन भारत।**

**सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम्।।**[13]

---

10 सारार्थवर्षिणी टीका -6.47

11 सारार्थवर्षिणी टीका -9.22

12 सारार्थवर्षिणी टीका -9.27

13 सारार्थवर्षिणी टीका -1.24

अस्मिन् पद्ये भगवतः भक्तिवश्यत्वं प्रतिपादयति आचार्यः विश्वनाथः एवम् –

**हृषीकेशः सर्वेन्द्रियनियन्ताप्येवमुक्तोऽर्जुनेनादिष्टः अर्जुनवागिन्द्रियमात्रेणापि नियम्योऽभूदित्यहो प्रेमवश्यत्वं भगवत् इति भावः। गुडाकेशेन- गुडा यथा माधुर्यमात्रप्रकाशकास्तत्तथा स्वीयस्नेहरसास्वादप्रकाशकाः अकेशा विष्णुब्रह्मशिवा यस्य तेन, - अकारो विष्णुः, को ब्रह्मा, ईशो महादेवः। यत्र सर्वावतारि-चूडामणीन्द्रः स्वयं भगवान् श्रीकृष्ण एव प्रेमाधीनः सन् आज्ञानुवर्ती बभूव।**

हृषीकाणाम् ईशः नाम इन्द्रियाणां नियन्तापि प्रेमवश्यतया अर्जुनवागिन्द्रियमात्रेण नियम्याभूत् इत्यत्र यथा भगवतः प्रेमवश्यत्वं स्फुटीकृतं तथा भक्तस्य सख्यभावेन भगवतवशीकारित्वं स्पष्टमेव। एवं स्थालीपुलाकन्यायेन सारार्थवर्षिण्याः वैशिष्ट्यं क्रमशः प्रतिपाद्यते।

श्रीमद्भगवद्गीतायाः सारार्थवर्षिण्यां टीकायां उपक्रमादारभ्य उपसंहारं यावत् भगवद्भक्तिरेव संकीर्तितास्ति। शुद्धभक्तेः वरीयस्त्वं प्रतिपाद्य भगवद्गीतायां व्यासः अवादित् –

**मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः।**

**असंशयं समग्रं यथा ज्ञास्यति तच्छृणु ।।**[14]

अस्यां टीकायाम् आचार्यः लिखति प्रथमेन अध्यायषट्केन अन्तकरणशुद्ध्यर्थकनिष्ठकामकर्मसापेक्षौ मुखफलसाधनौ ज्ञानयोगौ उक्तौ।

इदानीम् अनेन द्वितीयाध्यायषट्केन "कर्मज्ञानादिमिश्र श्रवणान्निष्कामत्वसकामत्वाभ्यां च सालोक्यादिसाधकः, सर्वमुख्यः कर्मज्ञानादिनिरपेक्ष एव

[14] सारार्थवर्षिणी टीका -7.1

प्रेमवत्पार्षदत्वलक्षणमुक्तिफलसाधकः”। प्रकरणेऽस्मिन् यत् कर्मणा प्राप्यते ज्ञानेन लभ्यते तपसा साध्यते वैराग्येण समुपास्ये तद्भक्तियोगेन भवतीति प्रतिपाद्यते। तदुक्तं भागवते-

**यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् ।**

**योगेन दानधर्मेण श्रेयोभिरितरैरपि ।।**

**सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा ।**

**स्वर्गापवर्गं मद्धाम कथञ्चिद् यति वाञ्छति।।**[15]

इत्यादौ सर्वसाधनगरीयसी भक्तिः इति प्रतिपादिता। किञ्च **“अकामसर्वकामात्मा मुख्यकामरुद्धादिधीः। तीव्रेण भक्तियोगेन यजेत** –

इत्यत्र श्रीमद्भागवतीयं सिद्धान्तं पुरस्कृत्य चक्रवर्तिपादाः स्वभावं व्यक्तीकरोति। “**विनापि साधनान्तरं स्वर्गापवर्गादिनिखिलसाधकश्च परमः स्वतन्त्रः सर्वसुकोऽपि सर्वदुष्करः श्रीमद्भक्तियोग उत्यते।** ” इत्यत्र असौ परमब्रह्मणः आस्वादने भक्तिरेव एकमात्रं कारणमिति प्रतिपादयितुकामः आचार्यः लिखति – “**सितशर्करा-रसग्रहणे यथा रसनैव कारणं, न तु चक्षुः श्रोत्रादिकं, तथैव परब्रह्मास्वादे भक्तिरेव कारणम्।**” अत्र एव भक्तेः परमं गाम्भीर्यं परमं च रहस्यम् आचार्येण उदघाटि। किञ्च – “**भक्त्याहमेकया ग्राह्यः**” “**भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः**” इत्यत्र भगवतः सविशेषत्वं प्रतिपादितः।

योगेषु च भक्तियोगस्य वैशिष्ट्यं साक्षातव्यासेन प्रतिपादितमिति आचार्येण अभासि । तद्यथा –

---

15 श्रीमद्भागवतम् -11/20/32,33

**योगिनामपि सर्वेषां मद्गतेनान्तरात्मना।**

**श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ।।**[16]

अपि च भगवतः संविशेषत्वप्रतिपादकम् अन्यत् वाक्यं यथा – "**तथैव मयि श्यामसुन्दरे पीताम्बरे आसक्ति आसक्तिभूमिकारूढं मनो यस्य तथाभूत एव त्वं मां ज्ञास्यति इत्यर्थः।**"

अव्यक्तं ब्रह्म तत्र एव आसक्तचेतसां तदेव अनुवुभुषूणां तत् प्राप्तौ क्लेशो भवति अधिकतरः । उक्तञ्च –

**क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।**

**अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते।।** [17]

निर्विशेषब्रह्मोपासकेभ्यः भक्तिरेव एकं साधनम् इति प्रतिपादयति आचार्यः विश्वनाथः चक्रवर्तिः – "**तथा हीन्द्रियाणां शब्दादिज्ञानविशेष एव शक्तिः, न तु विशेषेतरज्ञाने इति। अत इन्द्रियनिरोधस्तेषां निर्विशेषज्ञानमिच्छतामवश्य-कर्त्तव्य एव । इद्रियाणां निरोधस्तु स्त्रोतस्वीनामिव निरोधो दुष्करः एव, यदुक्तं सनत्कुमारेण**" –

**यत्पादपङ्कजपलाशविलासभक्त्या कर्माशयं ग्रथिमुद्ग्रयन्ति सन्तः ।**

**तद्वन्नरिक्तमतयो यतयोऽपि रुद्धस्त्रोतोगणास्तमरणं भज वासुदेवम् ।।**

**क्लेशो महानिह भवार्णवमप्लवेशं, षड्वर्गनक्रमसुखेन तितीर्षयन्ति ।**

**तत् त्वं हरेर्भगवतो भजनीयमङ्घ्रिं कृत्वोडुपं व्यसनमुत्तर दुस्तरार्णम्।।**[18]

---

[16] सारार्थवर्षिणी टीका -6.47

[17] सारार्थवर्षिणी टीका -12.5

विविधक्लेशभूते सति यदि गतिः भवति तर्हि तत्र भगवद्भक्तिरेव साधनम्। “**तावता क्लेशेनापि सा गतिर्यद्यवाप्यते, तदपि भक्तिमिश्रेणैव । भगवति भक्तिं विना केवलब्रह्मोपासकानान्तु केवलक्लेश एव लाभो, न तु ब्रह्मप्राप्तिः ।**”

भक्तिमार्गं न आश्रयन्तः साधकाः क्लेशमेव प्राप्नुवन्ति । तदुक्तं ब्रह्मणा –“ **तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनाम्**”।[19] इति।

अनन्यभक्तिद्वारा भगवत्कृपया च अस्मात् भवसागरात् सुगमतया मुक्तिः भवति। उक्तञ्च –

**ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।**

**अनन्येनैव योगेन मां ध्यायन्त उपासते।।**[20]

अस्य श्लोकस्य टीकायाम् आचार्यः विश्वनाथः ज्ञानकर्मापेक्षया भक्तेः एव वैशिष्ट्यं वर्तते इति प्रतिपादयति। तदेवम् –

“ **मयि मत्प्राप्त्यर्थं संन्यस्य त्यक्त्वा सन्नासशब्दस्य त्यागार्थत्वात्, अनन्येनैव ज्ञान-कर्म-तपस्यादिरहितेनैव योगेन भक्तियोगेन ।** यदुक्तम्-

**“यत् कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्।”**

इत्यनन्तरं -

**“सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा ।**

**स्वर्गापवर्गं मद्धाम कथञ्चिद्यदि वाञ्छति।।”**[21]

---

18 श्रीमद्भाग. 20/21/ 39,40

19 श्रीमद्भाग. 10/14/04

20 सारार्थवर्षिणी टीका – 12.6

समस्तकर्माणि मदर्थं परित्यज्य कर्म-ज्ञान-तपादिभ्यः मुक्तः सन् अनन्यया भक्त्या मामुपासते सः भक्तः सुखपूर्वकम् अस्मात् संसारात् मुक्तः भवतीति। अतः एव टीकारः कथयति ज्ञान-कर्मापेक्षया भक्तिरेव श्रेष्ठा वर्तते। इति।

भवान् नरायणः एव अस्य संसारस्य बन्धच्छेदकः, जीवेश्वरयोः अंशोऽपि सः एव। इति पञ्चदशाध्याये वर्णितं महिर्षिव्यासेन। उक्तञ्च –

**यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः।**

**अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥**[22]

श्लोकेऽस्मिन् आचार्यः विश्वनाथः प्रतिपादयति यत् भक्तिद्वारा एव भगवान् साध्योऽस्ति। तद्यथा – **“ब्रह्मोपासकै परमात्मोपासकैः स्वसाध्यफलसिद्ध्यर्थं भगवतो भक्तिरवश्यं कर्त्तव्यैव भगवदुपासकैस्तु स्वसाध्यफलसिद्ध्यर्थं न ब्रहोपासनापि क्रियते – “न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह”इति।, “ यत् कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्” इत्यादौ “सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा। स्वर्गापवर्गं मद्धाम कथञ्चिद् यदि वाञ्छति॥”**

भगवत्-प्राप्तेः साधनं तु ज्ञानयोगो भक्तियोगः चास्ति। ज्ञान-भक्तियोगयोः फलं वस्तुतः मोक्षः एव। अतः एव भगवदुपासनया स्वर्गापवर्गप्रेमादीनि सर्वफलान्येव लब्धं शक्यन्ते। भगवत्प्राप्तिः तु भक्तिर्भोगेण एव साध्या अस्ति।

**॥ इत्यलम् ॥**

---

[21] श्रीमद्भाग.11/20/32-33

[22] सारार्थवर्षिणी टीका -15.18